March 2019 Reg. No. ..................................... **FY 10**

Name ........................................

## Part - II

## SANSKRIT

Maximum : 80 Scores

Time : 2½ Hours

Cool off time : 15 Minutes

***General Instructions to Candidates :***

- There is a 'Cool off time' of 15 minutes in addition to the writing time.
- Use the 'Cool off time' to get familiar with questions and to plan your answers.
- Read the instructions carefully.
- Read the questions carefully before answering.
- Calculations, figures and graphs should be shown in the answer sheet itself.
- Give equations wherever necessary.
- Electronic devices except nonprogrammable calculators are not allowed in the Examination Hall.

**निर्देशा: –**

प्रश्नानाम् उत्तराणि निर्देशानुसारं लिखत ।

प्रश्नान् प्रश्ननिर्देशाञ्च सावधानं पठत ।

प्रश्नानां वाचनाय 15 निमेषा: कल्पिता: ।

**1.** कोष्ठकात् समुचितम् उत्तरं निर्धार्य लिखत । **(5 × 1 = 5)**

**क)** कालिदासेन विरचितम् महाकाव्यम्?

(कर्णभारम्, कुमारसम्भवम्, चारुदत्तम्)

**ख)** अष्टाङ्गहृदयं नाम आयुर्वेदग्रन्थस्य कर्ता क:?

(वाग्भट:, भास:, भारवि:)

**ग)** 'नमति' इति पदं कस्मिन् गणे भवति?

(सगणे, नगणे, मगणे)

घ) 'पञ्चत्वमापु:' इति पदस्य अर्थ: क:?
(सन्तोषं प्रापु:, स्नानं प्रापु:, मरणं प्रापु:)

ङ) भर्तृहरिणा विरचितं ........... सुभाषितानां सञ्चय: भवति ।
(शतकत्रयं, कादम्बरी, मुक्तमाला)

**2.** इष्टतम: श्लोक: क: इति सकारणं लिखत । **(6)**

क) नहि देहिनि शोभनं भवे-
च्चरितार्थे सति जीवितं पुन: ।
सुतरां नटने समापिते
स च रङ्गाद्विरमेत् कुशीलव: ।।

ख) इयमस्तुनतिर्ममान्तिमा
दिनसाम्राज्यपते दिवस्पते ।
कनकांशुशरौघधारिणे
भवते दुष्प्रसहप्रदीप्तये ।।

ग) अथवातिमनोहराद्बहि-
र्जगतो मे विरहो न सम्भवेत् ।
अवनौ च तनुर्मनोरथो
मम चैषां सुषमासु लेष्यते ।।

**3.** 'क' विभागे प्रदत्तमाशयं पठित्वा तदाशयप्रतिपादकं श्लोकं 'ख' विभागात् चित्वा लिखत । **(6)**

| | 'क' विभाग | 'ख' विभाग |
|---|---|---|
| 1. | सज्जना: अभिवृद्धौ निरहङ्कारा: भवन्ति । | साहित्यसङ्गीत कलाविहीन: साक्षात्पशु: पुच्छविषाणहीन: ।<br>तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशुनाम् ।। |
| 2. | प्रयत्नमवलम्ब्य-जना: त्रिधा भिन्ना: । | भवन्ति नम्रास्तरव: फलागमैर्नवाम्बुभिर्दूरविलम्बिनो घना: ।<br>अनुद्धृता: सत्पुरुषा: समृद्धिभि: स्वभाव एवैष परोपकारिणाम् ।। |
| 3. | साहित्यसङ्गीत कला-विहीना: जना: केवलं पशुतुल्या: । | प्रारभ्यते न खलु विघ्नभयेन नीचै: प्रारभ्य विघ्नविहता विरमन्ति मध्या: ।<br>विघ्नै: पुन: पुनरपि प्रतिहन्यमाना: प्रारब्धमुत्तमजना न परित्यजन्ति ।। |

4. अध: प्रदत्तयो: प्रश्नयो: **एकस्य** उत्तरं लिखत । **(1 × 2 = 2)**

**क)** गद्यभागं पठित्वा रेखाङ्कितपदानां स्थाने समानार्थकपदानि कोष्ठकात् चित्वा लिखत ।

जलमाहर्तुं गतं चिरायितं भवन्तं प्रति व्याकुलो गुरुवर: । महाजनो येन गत: स पन्था इति ।

(विहाय, दु:खित:, मार्ग:)

**ख)** उत्तरं लिखत ।

**i)** ''महत्तरां भिक्षां याचे ।'' शक्र: कं प्रति वदति ?

**ii)** ''तेन हि जित्वा पृथिवीं ददामि ।'' कर्ण: कं प्रति वदति ?

5. गद्यक्रमं पूरयत । **(4)**

नहि देहिनि शोभनं भवे-
च्चरितार्थे सति जीवितं पुन: ।
सुतरां नटने समापिते
स च रङ्गाद्विरमेत् कुशीलव: ।।

गद्यक्रम: ।

देहिनि ......... सतिपुन: .......... नहि शोभनं भवेत् । नटेन .......... समापिते (सति) स कुशीलव: ........... विरमेत् ।

6. अध: प्रदत्तयो: प्रश्नयो: **एकस्य** उत्तरं लिखत । **(6)**

**क)** ''कर्मणैव हि संसिद्धि:'' इति विषयमधिकृत्य सूचनानुसारं लघूपन्यासं लिखत ।

**सूचना:** – (रत्नाकर:, सप्तर्षीणां यात्रा, कर्मफलं, तत्वावबोध:, परिवर्तनं, वाल्मीकि:)

**ख)** पाठभागानुसारं कथास्तम्भं क्रमीकुरुत ।

**i)** वत्सेति सम्बोधनया निषादस्य मन: आर्द्रतामभवत् ।

**ii)** भार्याया: प्रतिवचनं निशम्य खिन्नोऽभवत् ।


**iii)** खड्गं प्रसार्य कश्चन निषाद: आपतत् ।

**iv)** पश्चात्तापविवश: मुनीनां पुरत: अतिष्ठत् ।

**v)** पापफलं कलत्र पुत्रादय: अनुभवन्ति वा ? इति मुनि: अवदत् ।

**vi)** कर्णकठोरं गर्जनं श्रुत्वा सप्तर्षय: चकिता: अभवन् ।

7. चित्रे सूचितानि अक्षराण्युपयुज्य चत्वारि माहेश्वरसूत्राणि लिखत । (4 × 1 = 4)




उदा: – हयवरट् ।

i) ........... ।

ii) ........... ।

iii) ........... ।

iv) ........... ।

8. पेटिकायां प्रदत्तानि पदान्युपयुज्य दिनचर्यां पुनर्लिखत । (6)

| |
|---|
| नववादने, विद्यालयात्, सार्धसप्तवादने, |
| प्रविशति, स्नानं करोति, नूतनं |

उत्तिष्ठति : रमेश: प्रभाते पञ्चवादने उत्तिष्ठति । शौचाद्यनन्तरं ........... ।

पाठं पठति : ......... आरभ्य गृहपाठं करोति ।

विद्यालयं गच्छति: ......... प्रभाते भक्षणानन्तरं विद्यालयं गच्छति । पाठं पठति ।

व्यायाम: : पञ्चवादने ....... प्रत्यागत्य व्यायामं करोति । ....... पाठभागान् पठति ।

निद्रा : रात्रिभोजनानन्तरं दशवादने निद्रां .......... ।

**9.** श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

दोषेण तीव्रो विषयः
कृष्णसर्पविषादपि ।
विषं निहन्ति भोक्तारं
द्रष्टारं चक्षुषाप्ययम् ।।

**प्रश्ना :**

**क)** विषयः कथं तीव्रः भवति? **(1)**

**ख)** किं भोक्तारं निहन्ति? **(1)**

**ग)** श्लोकस्याशयं स्ववाक्यैः लिखत । **(4)**

**10.** अधः प्रदत्तयोः प्रश्नयोः **एकस्य** उत्तरं लिखत । **(6)**

**क)** द्वौ नाटकसङ्केतावधिकृत्य लघुटिप्पणीं लिखत ।

1. नेपथ्यम्  2. आत्मगतम्  3. प्रकाशम्

**ख)** अधः प्रदत्तं गद्यभागं पठित्वा कर्णशक्रयोः मिथः सम्भाषणं लिखत ।

भोःकर्ण! महत्तरां भिक्षां याचे । अये वीर्यवान् शब्दः । एषः न केवलं श्रीमान् द्विजवरोऽस्ति । भो मेघाः सूर्येणैव निवृत्य गच्छन्तु भवन्तः । दृढं प्रीतोऽस्मि भगवन् । भोःकर्ण! सूर्य इव, चन्द्र इव तिष्ठतु ते यशः । भगवन् किं नु वक्तव्यं दीर्घायुर्भवेति । अथवा एतदेव शोभनम् । किमहं ददामि? महत्तरां भिक्षां भवतों प्रदास्ये ।

शक्रः : भोः कर्ण! ........... ।

कर्णः : अये वीर्यवान् शब्दः । एषः न केवलं श्रीमान् द्विजवरोऽस्ति ।

शक्र : ..............

कर्णः : दृढं प्रीतोऽस्मि ।

शक्रः : किं नु वक्तव्यं ........... ।

कर्णः : किमहं ............?

शक्रः : महत्तरां भिक्षां ............ ।

कर्णः : ............. भवते प्रदास्ये ।

**11.** अध: प्रदत्तयो: प्रश्नयो: **एकस्य** उत्तरं लिखत । **(6)**

**क)** श्लोकं पठित्वा आशयं लिखत ।

अकिञ्चन: सन् प्रभव: ससम्पदां

त्रिलोकनाथ: पितृसद्मगोचर: ।

स भीमरूप: शिव इत्युदीर्यते

न सन्ति याथार्थ्यविद: पिनाकिन: ।।

(**सूचना:** – पार्वत्या: प्रतिवचनं, श्मशानवासी परमेश्वर:, सर्वसम्पदां नाथ:, मङ्गलस्वरुप:)

**ख)** विवेकानन्दसन्देशमधिकृत्य लघुटिप्पणीं लिखत ।

(**सूचना :**– युवकानाम् आदर्शभूत:, चिक्कागोप्रभाषणम्, श्रीरामकृष्णपरमहंस:, प्रभाषक:, यतिकेसरि:)

**12.** खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत । **(5 × 1 = 5)**

देवशर्मण: वाण्या प्रबुद्धो धीरदास: प्रोवाच – ''स्मरति भवान्? बाल्ये वयं चत्वार: मित्रत्वेन वसाम: स्म । तदानीं ग्राममागतं पण्डितवर्यं वीक्ष्य तत्समाना: भवेम इति निश्चितवन्त: । तदर्थं कन्याकुब्जमेव गन्तव्यमिति निर्णीय अत्र आगता: । द्वादश वर्षाणि अतीतानि गुरुकुलवासेन । एवं मिथो भाषमाणौ तौ उपाचार्यं प्रापतु: । तयो: सुहृदौ प्रवरसेन: भुवनभूतिश्च । विश्रमावसरे ते चत्वार: सुहृद: सल्लापम् आरभन्त ।

**प्रश्ना: –**

**क)** प्रबुद्धो धीरदास: प्रोवाच । कस्य वाण्या?

**ख)** कति वर्षाणि तै: अतीतानि?

**ग)** तयो: सुहृदौ कौ?

**घ)** ते चत्वार: सुहृद: ......... आरभन्त ।
(कलहम्, सल्लापम्, भोजनम्)

**ङ)** कथांशस्य उचितं शीर्षकं लिखत ।

**13.** प्रश्नानाम् उत्तराणि लिखत । **(3 × 1 = 3)**

**क)** ''यत्र सादृश्यलक्ष्मीरुल्लसति द्वयो:'' तत्र क: अलङ्कार:?

**ख)** सम्भावना स्यात् - अलङ्कार:?

**ग)** ''धूमस्तोमं तम: शङ्के- कोकीविरहशुष्मणाम् ।'' अत्र उदाहरणे क: अलङ्कार:?

**14.** वृत्तलक्षणं पूरयत । **(3 × 1 = 3)**

**क)** उक्ता वसन्ततिलका ................ ।

**ख)** ................ वंशस्थमुदीरितं जरौ ।

**ग)** अनन्तरोदीरित ............ पादौयदीयावुपजातयस्ता: ।।
(लक्ष्मभाजौ, तभजा जगौग:, जतौ तु, तौ जगौ ग:)

**15.** प्रदत्तं गद्यभागं प्रादेशिकभाषया आङ्गलभाषया वा अनुवदत । **(5)**

एकदा स्वामीविवेकानन्द: काशीनगरसमीपम् अटन्नासीत् । तदा केचन वानरा: मार्गमवरुध्य अतिष्ठन् । भयेन स: तत: अधावत् । कश्चन पथिक: एवमवदत् । तेषाम् अभिमुखं पलायस्व ।

**16.** यथोचितं योजयत । **(4 × 1 = 4)**

| **क विभाग: ।** | | **ख विभाग: ।** | |
|---|---|---|---|
| a) | पाणिनि: । | i) | पि. के. नारायणपिल्ला । |
| b) | चिन्ताविष्टयायसीता | ii) | अष्टाध्यायी । |
| c) | भास: | iii) | कुमारनाशान् । |
| d) | विश्वभानु: | iv) | कर्णभारम् । |

**17.** प्रदत्तं गद्यांशं पठित्वा क्त्वान्त, ल्यबन्त, तुमुन्नन्त पदानि चित्वा लिखत । **(3 × 1 = 3)**

बहुप्रयत्नंकृत्वाऽपि किमपि फलं न लब्धम् । एवं विचिन्त्य स: दु:खितोऽभूत् । कतिपयदिनानन्तरं स: मात्रा दाक्ष्या साकं जलमाहर्तुम् अगच्छत् ।

**क)** क्त्वान्तम् । ............... ।

**ख)** ल्यबन्तम् । ............... ।

**ग)** तुमुन्नन्तम् । ............... ।